[1]जिष्णुः,[A] [2]धनञ्जयः, समितिञ्जयः, [3]जयी, [B]जयिनी, [4]जयकः; [5]जयमानः, जापः, जिगीषुः, विजिगीषुः,[C] जेज्यः ; जेतव्यम्, जापयितव्यम्, जिगीषितव्यम्, जेजीयितव्यम्; जयनीयम्, जापनीयम्, जिगीषणीयम्, जेजीयनीयम्; [6]जय्यम्-जेयम्[D], जित्यः [7][हलिः], जाप्यम्, जिगीष्यम्, जेजीय्यम्; [E]ईषज्जयः-दुर्जयः-सुजयः;

---

1. 'ग्लाजिस्थश्च ग्स्नुः' (3-2-139) इति तच्छीलादिषु कर्तृषु ग्स्नुः प्रत्ययः। 'ग्क्ङिति च' (1-1-5) इत्यत्र गकारस्यापि प्रश्लेषात् गुणो न भवति। 'आदेशप्रत्यययोः' (8-3-59) इति षत्वम्।
2. 'संज्ञायां भृतॄवृजिधारिसहितपिदमः' (3-2-46) इति संज्ञायां खच्-प्रत्यये, 'खित्यनव्ययस्य' (6-3-66) इति पूर्वपदस्य मुमागमः।
'विश्वंभरा, साम रथन्तराख्यं, पतिंवरा चापि, धनञ्जयश्च।
शत्रुंसहः कोऽपि, वसुन्धरा च, शत्रुन्तपोऽरिन्दम एवमूह्यम्॥' इति प्रक्रियासर्वस्वे, 'संज्ञायां भृ—' (3-2-46) इति सूत्रस्य क्रमेणोदाहरणानि प्रदर्शितानि।
3. 'जिदृक्षिविश्रीण्—' (3-2-157) इति तच्छीलादिषु कर्तृषु इनिप्रत्ययः।
4. 'आशिषि च' (3-1-150) इति वुन्। जयतात् जयकः।
5. 'ताच्छील्यवयोवचनशक्तिषु चानश्' (3-2-129) इति शक्तौ गम्यमानायां चानश्। मध्ये विकरणप्रत्ययः शप्।
'सहैव चरमाणौ द्वौ वहमानौ मितं धनुः।
जयमानौ च रक्षांसि राघवौ मुनिमन्वितौ॥' इति प्र. सर्वस्वे।
6. 'अचो यत्' (3-1-97) इति यति गुणे, 'क्षय्यजय्यौ शक्यार्थे' (6-1-81) इति अयादेशो निपातितः। जेतुं शक्यम्=जय्यम्। अन्यत्र जेयम्।
7. 'विपूयविनीयजित्या मुञ्जकल्कहलिषु' (3-1-117) इति सूत्रेण हलौ=कृष्टसमीकरणार्थे स्थूलकाष्ठे वाच्ये क्यप् भवति। जित्यो हलिः=बलेन कष्टव्य इत्यर्थः।

A. 'वसन् माल्यवति ग्लास्नू रामो जिष्णुरधृष्णुवत्॥' भ. का. 7. 4.

B. 'वीतप्रभावतनुरप्यतनुप्रभावः प्रत्याचकाङ्क्ष जयिनीं भुजवीर्यलक्ष्मीम्।
अस्त्रेषु भूतपतिनापहृतेषु जिष्णुर्वर्षिष्यता दिनकृतेव जलेषु लोकः॥'
किरातार्जुनीये 16.64.

C. 'विजिगीषुः पुनश्चक्रे व्यूहं दुर्जयमिन्द्रजित्॥' भ. का. 9. 70.

D. 'आत्मानं वनवासं च जेयं चारिं रघूत्तमः॥' भ. का. 6. 47.

E. 'यस्ताटकामकृत बाल [काल] सखैः पृषत्कैः
ईषज्जयः स्फुटमनेन दशाननोऽपि॥' अनर्घराघवे 3. 33.